व्याख्या - यदि भानुः अर्थात् सूर्यः नाम तपनः भास्करः दिनकरः दिनमणिः पश्चिमदिग्विभागे नाम पश्चिमस्यां दिशि उदयति अर्थात् उद्गच्छति नाम उदयं गच्छति उदयं प्राप्नोति वा । सामान्यतः सूर्यः पूर्वस्यां दिशि उदयति । सूर्यस्य उदयः पूर्वस्यां दिशि भवति । सूर्योदयः पूर्वस्यां दिशि भवति । पश्चिमस्यां दिशि सूर्योदयः न सम्भवति । किन्तु कदाचित् कस्मादपि कारणात् सूर्यः पूर्वस्यां दिशि न अपि तु पश्चिमस्यां दिशि उदयति ।

यदि मेरुः नाम मेरुपर्वतः सुमेरुपर्वतः इत्यपि उच्यते प्रचलति नाम चलनत्वं चलत्वं वा प्राप्नोति । इतस्ततः चलति चलितुमारभते वा । चलस्वभावो वा भवति । अर्थात् मेरुपर्वतः अतीव विशालः पर्वतः भवति । अतः स्वयं न चलति, चलितुं न शक्नोति न वा कोऽपि तं चालयितुं शक्नोति । मेरुपर्वतस्य चलनमसम्भवः । मेरुपर्वतस्य चलनं न सम्भवति । किन्तु कदाचित् यदि एतादृशः विशालः मेरुपर्वतः चलति चलनशीलः भवति चलत्वं प्राप्नोति वा इत्यर्थः ।

यदि वह्निः नाम अग्निः अर्थात् अनलः शीततां याति अर्थात् शीतलः भवति शीतलस्वभावो वा भवति । सामान्यतः अग्निः उष्णस्वभावः भवति । कदापि शीतलस्वभावः न भवति । अग्निः सर्वदा उष्णस्वभावः भवति । उष्णो भवति । न कदापि शीतलो भवति । किन्तु कदाचित् यदि अग्निः शीततां याति अर्थात् शीतलः भवति शीतलस्वभावो वा भवति इत्यर्थः ।

यदि पद्मं नाम पद्मपुष्पं कमलं राजीवं पंकजं पुष्पं शैलशृंगे अर्थात् पर्वतस्य शिखरे शीलायां एकस्मिन् विशाले प्रस्तरखण्डे पाषाणखण्डे शिलाखण्डे वा विकसति अर्थात् विकसितं भवति प्रस्फुटितं भवति प्रस्फुटति । अर्थात् पद्मपुष्पं जले विकसति न कदाचित् स्थलभागे पाषाणखण्डे वा विकसति । पद्मपुष्पस्य विकसनं विकासो वा स्थले शिलायां वा न सम्भवति । किन्तु कदाचित् यदि इदं पद्मपुष्पं कमलपुष्पं वा पर्वताग्रे शिलाखण्डस्य उपरि विकसति इत्यर्थः ।

अर्थात् यद्यपि सूर्यः पश्चिमस्यां दिशि उदयति उदयं भवति अर्थात् यद्यपि पश्चिमस्यां दिशि सूर्योदयः भवति । यद्यपि विशालकायः मेरुपर्वतः इतस्ततः चलति चलितुमारभते वा । यद्यपि अग्निः अनलः तस्य उष्णस्वभावं विहाय शीततां याति अर्थात् शीतलस्वभावं प्राप्नोति । यद्यपि पद्मपुष्पं जलं विहाय स्थलभागे नाम पर्वतस्य शिखरभागे शिलायाः उपरि विकसति प्रस्फुटितं भवति

तथापि सज्जनानां भाषितं पुनरुक्तं न भवति । अर्थात् सत्पुरुषाणां साधुजनानां भाषितं कथितं वचनं वा अर्थात् यत्किमपि सुजनाः भाषन्ते कथयन्ति वा तत् पुनः उक्तं न भवति । अर्थात् सुजनाः यद् एकवारं कथयन्ति तदेव भवति । ते तद् द्विवारं न वदन्ति । तस्मात् ते न टलन्ति । तत्र भाषणे ते परिवर्तनं न कुर्वन्ति । ते यद् वदन्ति तत् सम्यग् विचिन्त्य एव वदन्ति । तस्मात् न विचलन्ति । न पश्चात् गच्छन्ति । यद्यपि असम्भवः कदाचित् सम्भवो भवति तथापि सज्जनाः तेषां वचनात् पश्चात् न गच्छन्ति । इति अर्थः ॥